शाङ्करभाष्यानुसारी
श्रीमद्बादरायणप्रणीतब्रह्मसूत्रपाठः

समन्वयाख्ये प्रथमाध्याये
प्रथमः पादः।

अधिकरणानि।	सूत्राणि।
१ जिज्ञासाधिकरणम् —	१ अथातो ब्रह्मजिज्ञासा ॥
२ जन्माद्यधिकरणम् —	२ जन्माद्यस्य यतः ॥
३ शास्त्रयोनित्वाधिकरणम् —	३ शास्त्रयोनित्वात् ॥
४ समन्वयाधिकरणम् —	४ तत् तु समन्वयात् ॥
५ ईक्षत्यधिकरणम्	५ ईक्षतेर्नाशब्दम्।
	६ गौणश्चेन्न, आत्मशब्दात्।
	७ तन्निष्ठस्य मोक्षोपदेशात्।
	८ हेयत्वावचनाच्च।
	९ स्वाप्ययात्।
	१० गतिसामान्यात्।
	११ श्रुतत्वाच्च ॥
६ आनन्दमयाधिकरणम्	१२ आनन्दमयोऽभ्यासात्।
	१३ विकारशब्दान्नेति चेन्न, प्राचुर्यात्।
	१४ तद्धेतुव्यपदेशाच्च।
	१५ मान्त्रवर्णिकमेव च गीयते।
	१६ नेतरोऽनुपपत्तेः।
	१७ भेदव्यपदेशाच्च।
	१८ कामाच्च नानुमानापेक्षा।
	१९ अस्मिन्नस्य च तद्योगं शास्ति ॥

७ अन्तराधिकरणम्
- २० अन्तस्तद्धर्मोपदेशात् ।
- २१ भेदव्यपदेशाच्चान्यः ॥

८ आकाशाधिकरणम् —२२ आकाशस्तल्लिङ्गात् ॥

९ प्राणाधिकरणम् —२३ अत एव प्राणः ॥

१० ज्योतिश्चरणाधिकरणम्
- २४ ज्योतिश्चरणाभिधानात् ।
- २५ छन्दोभिधानान्नेति चेन्न, तथा चेतोर्पणनिगदात्, तथा हि दर्शनम् ।
- २६ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ।
- २७ उपदेशभेदान्नेति चेन्न, उभयस्मिन्नप्यविरोधात् ॥

१ प्रतर्दनाधिकरणम्
- २८ प्राणस्तथानुगमात् ।
- २९ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ।
- ३० शास्त्रदृष्ट्या तूपदेशो वामदेववत् ।
- ३१ जीवमुख्यप्राणलिङ्गान्नेति चेन्न, उपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥

समन्वयाख्ये प्रथमाध्याये

द्वितीयः पादः ।

१ सर्वत्रप्रसिद्ध्यधिकरणम्
- १ सर्वत्र प्रसिद्धोपदेशात् ।
- २ विवक्षितगुणोपपत्तेश्च ।
- ३ अनुपपत्तेस्तु न शारीरः ।
- ४ कर्मकर्तृव्यपदेशाच्च ।
- ५ शब्दविशेषात् ।
- ६ स्मृतेश्च ।
- ७ अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न, निचाय्यत्वादेवं व्योमवच्च ।
- ८ संभोगप्राप्तिरिति चेन्न, वैशेष्यात् ॥

२ अत्त्रधिकरणम्	९ अत्ता चराचरग्रहणात् । १० प्रकरणाच्च ॥
३ गुहाप्रविष्टाधिकरणम्	११ गुहां प्रविष्टावात्मानौ तद्दर्शनात् । १२ विशेषणाच्च ॥
४ अन्तर[उपपत्त्य]धिकरणम्	१३ अन्तर उपपत्तेः । १४ स्थानादिव्यपदेशाच्च । १५ सुखविशिष्टाभिधानादेव च । १६ श्रुतोपनिषत्कगत्यभिधानाच्च । १७ अनवस्थितेरसंभवाच्च नेतरः ॥
५ अन्तर्याम्यधिकरणम्	१८ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् । १९ नच स्मार्तमतद्धर्माभिलापात् । २० शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥
६ अदृश्यत्वाधिकरणम्	२१ अदृश्यत्वादिगुणको धर्मोक्तेः । २२ विशेषणभेदव्यपदेशाभ्यां च नेतरौ । २३ रूपोपन्यासाच्च ॥
७ वैश्वानराधिकरणम्	२४ वैश्वानरः साधारणशब्दविशेषात् । २५ स्मर्यमाणमनुमानं स्यादिति । २६ शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न, तथादृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते । २७ अत एव न देवता भूतं च । २८ साक्षादप्यविरोधं जैमिनिः । २९ अभिव्यक्तेरित्याश्मरथ्यः । ३० अनुस्मृतेर्बादरिः । ३१ संपत्तेरिति जैमिनिः तथा हि दर्शयति । ३२ आमनन्ति चैनमस्मिन् ॥

समन्वयाख्ये प्रथमाध्याये

तृतीयः पादः ।

अधिकरणम्	सूत्राणि
१ द्युभ्वाद्यधिकरणम्	१ द्युभ्वाद्यायतनं स्वशब्दात् । २ मुक्तोपसृप्यव्यपदेशात् । ३ नानुमानमतच्छब्दात् । ४ प्राणभृच्च । ५ भेदव्यपदेशात् । ६ प्रकरणात् । ७ स्थित्यदनाभ्यां च ॥
२ भूमाधिकरणम्	८ भूमा संप्रसादादध्युपदेशात् । ९ धर्मोपपत्तेश्च ॥
३ अक्षराधिकरणम्	१० अक्षरमम्बरान्तधृतेः । ११ सा च प्रशासनात् । १२ अन्यभावव्यावृत्तेश्च ॥
४ ईक्षतिकर्मव्यपदेशाधि०—	१३ ईक्षतिकर्मव्यपदेशात् सः ॥
५ दहराधिकरणम्	१४ दहर उत्तरेभ्यः । १५ गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च । १६ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः । १७ प्रसिद्धेश्च । १८ इतरपरामर्शात् स इति चेन्न,असंभवात् ॥
६ ईश्वराक्षिपुरुषाधिकरणम्	१९ उत्तराच्चेदाविर्भूतस्वरूपस्तु । २० अन्यार्थश्च परामर्शः । २१ अल्पश्रुतेरिति चेत् तदुक्तम् ॥
७ अनुकृत्यधिकरणम्	२२ अनुकृतेस्तस्य च । २३ अपिच स्मर्यते ॥

८ प्रमिताधिकरणम्	२४ शब्दादेव प्रमितः । २५ हृद्यपेक्षतया तु मनुष्याधिकारत्वात् ॥
९ देवताधिकरणम्	२६ तदुपर्यपि बादरायणः संभवात् । २७ विरोधः कर्मणीति चेन्न, अनेकप्रतिपत्ते-र्दर्शनात् । २८ शब्द इति चेन्न, अतः प्रभवात् प्रत्य-क्षानुमानाभ्याम् । २९ अत एव च नित्यत्वम् । ३० समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च । ३१ मध्वादिष्वसंभवादनधिकारं जैमिनिः । ३२ ज्योतिषि भावाच्च । ३३ भावं तु बादरायणोऽस्ति हि ॥
१० अपशूद्राधिकरणम्	३४ शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि । ३५ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् । ३६ संस्कारपरामर्शात् तदभावाभिलापाच्च । ३७ तदभावनिर्धारणे च प्रवृत्तेः । ३८ श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥
११ कम्पनाधिकरणम्	—३९ कम्पनात् ॥
१२ ज्योतिरधिकरणम्	—४० ज्योतिर्दर्शनात् ॥
१३ अर्थान्तरत्वव्यपदेशाधिकरणम्	४१ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥
१४ सुषुप्त्युत्क्रान्त्यधिकरणम्	४२ सुषुप्त्युत्क्रान्त्योर्भेदेन । ४३ पत्यादिशब्देभ्यः ॥

समन्वयाख्ये प्रथमाध्याये

चतुर्थः पादः ।

१ आनुमानिकाधिकरणम्

१ आनुमानिकमप्येकेषामिति चेन्न, शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ।
२ सूक्ष्मं तु तदर्हत्वात् ।
३ तदधीनत्वादर्थवत् ।
४ ज्ञेयत्वावचनाच्च ।
५ वदतीति चेन्न, प्राज्ञो हि प्रकरणात् ।
६ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ।
७ महद्वच्च ॥

२ चमसाधिकरणम्

८ चमसवदविशेषात् ।
९ ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ।
१० कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥

३ संख्योपसंग्रहाधिकरणम्

११ न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ।
१२ प्राणादयो वाक्यशेषात् ।
१३ ज्योतिषैकेषामसत्यन्ने ॥

४ कारणत्वाधिकरणम्

१४ कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ।
१५ समाकर्षात् ॥

५ बालाक्यधिकरणम्

१६ जगद्वाचित्वात् ।
१७ जीवमुख्यप्राणलिङ्गान्नेति चेत् तद्व्याख्यातम् ।
१८ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥

६ वाक्यान्वयाधिकरणम्

१९ वाक्यान्वयात् ।
२० प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ।
२१ उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ।
२२ अवस्थितेरिति काशकृत्स्नः ॥

७ प्रकृत्यधिकरणम्
२३ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ।
२४ अभिध्योपदेशाच्च ।
२५ साक्षाच्चोभयाम्नानात् ।
२६ आत्मकृतेः परिणामात् ।
२७ योनिश्च हि गीयते ॥

८ सर्वव्याख्यानाधिकरणम्—२८ एतेन सर्वे व्याख्याता व्याख्याताः ॥

इति समन्वयाख्यः प्रथमाध्यायः

अविरोधाख्ये द्वितीयाध्याये

प्रथमः पादः ।

१ स्मृत्यधिकरणम्
१ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्न, अन्यस्मृत्यनवकाशदोषप्रसङ्गात् ।
२ इतरेषां चानुपलब्धेः ॥

२ योगप्रत्युक्त्यधिकरणम् — ३ एतेन योगः प्रत्युक्तः ॥

३ विलक्षणत्वाधिकरणम्
४ न विलक्षणत्वादस्य तथात्वं च शब्दात् ।
५ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ।
६ दृश्यते तु ।
७ असदिति चेन्न, प्रतिषेधमात्रत्वात् ।
८ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ।
९ न तु दृष्टान्तभावात् ।
१० स्वपक्षदोषाच्च ।
११ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः ॥

४ शिष्टापरिग्रहाधिकरणम्—१२ एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥

५ भोक्त्रापत्त्यधिकरणम् —१३ भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥

६ आरम्भणाधिकरणम्	१४ तदनन्यत्वमारम्भणशब्दादिभ्यः । १५ भावे चोपलब्धेः [भावाच्चोपलब्धेः] । १६ सत्वाच्चावरस्य । १७ असद्व्यपदेशान्नेति चेन्न, धर्मान्तरेण वाक्यशेषात् । १८ युक्तेः शब्दान्तराच्च । १९ पटवच्च । २० यथाच प्राणादि ॥
७ इतरव्यपदेशाधिकरणम्	२१ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः । २२ अधिकं तु भेदनिर्देशात् । २३ अश्मादिवच्च तदनुपपत्तिः ॥
८ उपसंहारदर्शनाधिकरणम्	२४ उपसंहारदर्शनान्नेति चेन्न, क्षीरवद्धि । २५ देवादिवदपि लोके ॥
९ कृत्स्नप्रसक्त्यधिकरणम्	२६ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा । २७ श्रुतेस्तु शब्दमूलत्वात् । २८ आत्मनि चैवं विचित्राश्च हि । २९ स्वपक्षदोषाच्च ॥
१० सर्वोपेताधिकरणम्	३० सर्वोपेता च तद्दर्शनात् । ३१ विकरणत्वान्नेति चेत् तदुक्तम् ॥
११ प्रयोजनवत्त्वाधिकरणम्	३२ न प्रयोजनवत्त्वात् । ३३ लोकवत् तु लीलाकैवल्यम् ॥
१२ वैषम्यनैर्घृण्याधिकरणम्	३४ वैषम्यनैर्घृण्ये न, सापेक्षत्वात्, तथाहि दर्शयति । ३५ न कर्माविभागादिति चेन्न,अनादित्वात् । ३६ उपपद्यते चाप्युपलभ्यते च ॥
१३ सर्वधर्मोपपत्त्यधिकरणम्	३७ सर्वधर्मोपपत्तेश्च ॥

अविरोधाख्ये द्वितीयाध्याये

द्वितीयः पादः ।

१ रचनानुपपत्त्याधिकरणम्

१ रचनानुपपत्तेश्च नानुमानम् ।
२ प्रवृत्तेश्च । ३ पयोम्बुवच्चेत् तत्रापि ।
४ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ।
५ अन्यत्राभावाच्च न तृणादिवत् ।
६ अभ्युपगमेऽप्यर्थाभावात् ।
७ पुरुषाश्मवदिति चेत् तथापि ।
८ अङ्गित्वानुपपत्तेश्च ।
९ अन्यथानुमितौ च ज्ञशक्तिवियोगात् ।
१० विप्रतिषेधाच्चासमञ्जसम् ॥

२ महद्दीर्घाधिकरणम्

११ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥

३ परमाणुजगदकारणत्वाधिकरणम्

१२ उभयथापि न कर्म, अतस्तदभावः ।
१३ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ।
१४ नित्यमेव च भावात् ।
१५ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ।
१६ उभयथा च दोषात् ।
१७ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥

४ समुदायाधिकरणम्

१८ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ।
१९ इतरेतरप्रत्ययत्वादिति चेन्न, उत्पत्तिमात्रनिमित्तत्वात् ।
२० उत्तरोत्पादे च पूर्वनिरोधात् ।
२१ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ।
२२ प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् । २३ उभयथाच दोषात् ।
२४ आकाशे चाविशेषात् ।
२५ अनुस्मृतेश्च ।
२६ नासतोऽदृष्टत्वात् ।
२७ उदासीनानामपि चैवं सिद्धिः ॥

५ अभावाधिकरणम्

२८ नाभाव उपलब्धेः ।
२९ वैधर्म्याच्च न स्वप्नादिवत् ।
३० न भावोऽनुपलब्धेः ।
३१ क्षणिकत्वाच्च ।
३२ सर्वथानुपपत्तेश्च ॥

६ एकस्मिन्नसंभवाधिकरणम्

३३ नैकस्मिन्नसंभवात् ।
३४ एवं चात्माकार्त्स्न्यम् ।
३५ नच पर्यायादप्यविरोधो विकारादिभ्यः।
३६ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः॥

७ पत्यधिकरणम्

३७ पत्युरसामञ्जस्यात् ।
३८ संबन्धानुपपत्तेश्च ।
३९ अधिष्ठानानुपपत्तेश्च ।
४० करणवच्चेन्न, भोगादिभ्यः ।
४१ अन्तवत्त्वमसर्वज्ञता वा ॥

८ उत्पत्त्यसंभवाधिकरणम्

४२ उत्पत्त्यसंभवात् ।
४३ नच कर्तुः करणम् ।
४४ विज्ञानादिभावे वा तदप्रतिषेधः ।
४५ विप्रतिषेधाच्च ॥

अविरोधाख्ये द्वितीयाध्याये

तृतीयः पादः ।

१ वियदधिकरणम्

१ न वियदश्रुतेः । २ अस्ति तु ।
३ गौणी, असंभवात् । ४ शब्दाच्च ।
५ स्याच्चैकस्य ब्रह्मशब्दवत् ।
६ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ।
७ यावद्विकारं तु विभागो लोकवत् ॥

२ मातरिश्वाधिकरणम् — ८ एतेन मातरिश्वा व्याख्यातः ॥

३ असंभवाधिकरणम् — ९ असंभवस्तु सतोऽनुपपत्तेः ॥

४ तेजोधिकरणम् —१० तेजोऽतस्तथाह्याह ॥

५ अबधिकरणम्	—११ आपः ॥
६ पृथिव्यधिकाराधिकरणम्	—१२ पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥
७ तदभिध्यानाधिकरणम्	—१३ तदभिध्यानादेव तु तल्लिङ्गात् सः ॥
८ विपर्ययाधिकरणम्	—१४ विपर्ययेण तु क्रमोऽत उपपद्यते च ॥
९ अन्तराविज्ञानाधिकरणम्	—१५ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्न, अविशेषात् ॥
१० चराचरव्यपाश्रयाधिकरणम्	१६ चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥
११ आत्माधिकरणम्	—१७ नात्मा, अश्रुतेर्नित्यत्वाच्च ताभ्यः ॥
१२ ज्ञाधिकरणम्	—१८ ज्ञोऽत एव ॥
१३ उत्क्रान्तिगत्यधिकरणम्	१९ उत्क्रान्तिगत्यागतीनाम् ।
	२० स्वात्मना चोत्तरयोः ।
	२१ नाणुरतच्छ्रुतेरिति चेन्न, इतराधिकारात् ।
	२२ स्वशब्दोन्मानाभ्यां च ।
	२३ अविरोधश्चन्दनवत् ।
	२४ अवस्थितिवैशेष्यादिति चेन्न, अभ्युपगमाद्धृदि हि ।
	२५ गुणाद्वा लोकवत् ।
	२६ व्यतिरेको गन्धवत् ।
	२७ तथा च दर्शयति ।
	२८ पृथगुपदेशात् ।
	२९ तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत् ।
	३० यावदात्मभावित्वाच्च न दोषः तद्दर्शनात् ।
	३१ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ।
	३२ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा ॥

१४ कर्त्रधिकरणम्

३३ कर्ता शास्त्रार्थवत्त्वात् ।
३४ विहारोपदेशात् । ३५ उपादानात् ।
३६ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः । ३७ उपलब्धिवदनियमः ।
३८ शक्तिविपर्ययात् ।
३९ समाध्यभावाच्च ॥

१५ तक्षाधिकरणम्

—४० यथाच तक्षोभयथा ॥

१६ परायत्ताधिकरणम्

४१ परात् तु तच्छ्रुतेः ।
४२ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥

१७ अंशाधिकरणम्

४३ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ।
४४ मन्त्रवर्णाच्च ।
४५ अपिच स्मर्यते ।
४६ प्रकाशादिवन्नैवं परः ।
४७ स्मरन्ति च ।
४८ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् । ४९ असंततेश्चाव्यतिकरः ।
५० आभास एव च ।
५१ अदृष्टानियमात् ।
५२ अभिसंध्यादिष्वपि चैवम् ।
५३ प्रदेशादिति चेन्न, अन्तर्भावात् ॥

अविरोधाख्ये द्वितीयाध्याये

चतुर्थः पादः ।

१ प्राणोत्पत्त्यधिकरणम्

१ तथा प्राणाः ।
२ गौण्यसंभवात् ।
३ तत् प्राक्श्रुतेश्च ।
४ तत्पूर्वकत्वाद्वाचः ॥

२ सप्तगत्यधिकरणम्
- ५ सप्त गतेर्विशेषितत्वाच्च ।
- ६ हस्तादयस्तु स्थितेऽतो नैवम् ॥

३ प्राणाणुत्वाधिकरणम् — ७ अणवश्च ॥

४ प्राणश्रैष्ठ्याधिकरणम् — ८ श्रेष्ठश्च ॥

५ वायुक्रियाधिकरणम्
- ९ न वायुक्रिये पृथगुपदेशात् ।
- १० चक्षुरादिवत् तु तत्सहशिष्ट्यादिभ्यः ।
- ११ अकरणत्वाच्च न दोषस्तथाहि दर्शयति ।
- १२ पञ्चवृत्तिर्मनो व्यपदिश्यते ॥

६ श्रेष्ठाणुत्वाधिकरणम् —१३ अणुश्च ॥

७ ज्योतिराद्यधिकरणम्
- १४ ज्योतिराद्यधिष्ठानं तु तदामननात् ।
- १५ प्राणवता शब्दात् ।
- १६ तस्य च नित्यत्वात् ॥

८ इन्द्रियाधिकरणम्
- १७ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ।
- १८ भेदश्रुतेः
- १९ वैलक्षण्याच्च ॥

९ संज्ञामूर्तिक्लृप्त्यधिकरणम्
- २० संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ।
- २१ मांसादि भौमं यथाशब्दमितरयोश्च ।
- २२ वैशेष्यात् तु तद्वादस्तद्वादः ॥

इति अविरोधाख्यो द्वितीयाध्यायः

साधनाख्ये तृतीयाध्याये

प्रथमः पादः।

१ तदन्तरप्रतिपत्त्यधिकरणम्

१ तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्।
२ त्र्यात्मकत्वात् तु भूयस्त्वात्।
३ प्राणगतेश्च।
४ अग्न्यादिगतिश्रुतेरिति चेन्न, भाक्तत्वात्।
५ प्रथमेऽश्रवणादिति चेन्न, ता एव ह्युपपत्तेः।
६ अश्रुतत्वादिति चेन्न, इष्टादिकारिणां प्रतीतेः।
७ भाक्तं वा, अनात्मवित्त्वात्, तथाहि दर्शयति ॥

२ कृतात्ययाधिकरणम्

८ कृतात्ययेऽनुशयवान्, दृष्टस्मृतिभ्याम्, यथेतमनेवं च।
९ चरणादिति चेन्न, उपलक्षणार्थेति कार्ष्णाजिनिः।
१० आनर्थक्यमिति चेन्न तदपेक्षत्वात्।
११ सुकृतदुष्कृते एवेति तु बादरिः ॥

३ अनिष्टादिकार्यधिकरणम्

१२ अनिष्टादिकारिणामपि च श्रुतम्।
१३ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्।
१४ स्मरन्ति च। १५ अपि च सप्त।
१६ तत्रापि च तद्व्यापारादविरोधः।
१७ विद्याकर्मणोरिति तु प्रकृतत्वात्।
१८ न तृतीये तथोपलब्धेः।
१९ स्मर्यतेऽपि च लोके। २० दर्शनाच्च।
२१ तृतीयशब्दावरोधः संशोकजस्य ॥

४ साभाव्यापत्त्यधिकरणम्—२२ साभाव्यापत्तिरुपपत्तेः ॥

५ नातिचिराधिकरणम् —२३ नातिचिरेण विशेषात् ॥

६ अन्याधिष्ठिताधिकरणम्
२४ अन्याधिष्ठितेषु पूर्ववदभिलापात् ।
२५ अशुद्धमिति चेन्न शब्दात् ।
२६ रेतःसिग्योगोऽथ ।
२७ योनेः शरीरम् ॥

साधनाख्ये तृतीयाध्याये

द्वितीयः पादः

१ संध्याधिकरणम्
१ संध्ये सृष्टिराह हि ।
२ निर्मातारं चैके पुत्रादयश्च ।
३ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ।
४ सूचकश्चहि श्रुतेः, आचक्षते च तद्विदः ।
५ पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ।
६ देहयोगाद्वा सोऽपि ॥

२ तदभावाधिकरणम्
७ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ।
८ अतः प्रबोधोऽस्मात् ॥

३ कर्मानुस्मृतिशब्दविध्यधिकरणम्
९ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥

४ मुग्धेऽर्धसंपत्त्यधिकरणम् — १० मुग्धेऽर्धसंपत्तिः परिशेषात् ॥

५ उभयलिङ्गाधिकरणम्

११ न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि ।
१२ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ।
१३ अपि चैवमेके ।
१४ अरूपवदेव हि तत्प्रधानत्वात् ।
१५ प्रकाशवच्चावैयर्थ्यात् ।
१६ आह च तन्मात्रम् ।
१७ दर्शयति च, अथो अपि स्मर्यते ।
१८ अत एव चोपमा सूर्यकादिवत् ।
१९ अम्बुवदग्रहणात् तु न तथात्वम् ।
२० वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् । २१ दर्शनाच्च ॥

६ प्रकृतैतावत्त्वाधिकरणम्

२२ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः । २३ तदव्यक्तमाह हि ।
२४ अपि च संराधने प्रत्यक्षानुमानाभ्याम् ।
२५ प्रकाशादिवच्चावैशेष्यं, प्रकाशश्च कर्मण्यभ्यासात् ।
२६ अतोऽनन्तेन, तथा हि लिङ्गम् ।
२७ उभयव्यपदेशात् त्वहिकुण्डलवत् ।
२८ प्रकाशाश्रयवद्वा तेजस्त्वात् ।
२९ पूर्ववद्वा । ३० प्रतिषेधाच्च ॥

७ पराधिकरणम्

३१ परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ।
३२ सामान्यात् तु ।
३३ बुद्ध्यर्थः पादवत् ।
३४ स्थानविशेषात् प्रकाशादिवत् ।
३५ उपपत्तेश्च । ३६ तथान्यप्रतिषेधात् ।
३७ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥

८ फलाधिकरणम्

३८ फलमत उपपत्तेः । ३९ श्रुतत्वाच्च ।
४० धर्मं जैमिनिरत एव ।
४१ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥

साधनाख्ये तृतीयाध्याये

तृतीयः पादः

१ सर्ववेदान्तप्रत्ययाधिकरणम्	१ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् । २ भेदान्नेति चेन्न, एकस्यामपि । ३ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च, सववच्च तन्नियमः । ४ दर्शयति च ॥
२ उपसंहाराधिकरणम्	५ उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ॥
३ अन्यथात्वाधिकरणम्	६ अन्यथात्वं शब्दादिति चेन्न, अविशेषात् । ७ न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् । ८ संज्ञातश्चेत् तदुक्तम्, अस्ति तु तदपि ॥
४ व्याप्त्यधिकरणम्	९ व्याप्तेश्च समञ्जसम् ॥
५ सर्वाभेदाधिकरणम्	१० सर्वाभेदादन्यत्रेमे ॥
६ आनन्दाद्यधिकरणम्	११ आनन्दादयः प्रधानस्य । १२ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे । १३ इतरे त्वर्थसामान्यात् ॥
७ आध्यानाधिकरणम्	१४ आध्यानाय प्रयोजनाभावात् । १५ आत्मशब्दाच्च ॥
८ आत्मगृहीत्यधिकरणम्	१६ आत्मगृहीतिरितरवदुत्तरात् । १७ अन्वयादिति चेत् स्यादवधारणात् ॥
९ कार्याख्यानाधिकरणम्	१८ कार्याख्यानादपूर्वम् ॥
१० समानाधिकरणम्	१९ समान एवं चाभेदात् ॥

११ संबन्धाधिकरणम्	२० संबन्धादेवमन्यत्रापि । २१ न वा विशेषात् । २२ दर्शयति च ॥
१२ संभृत्यधिकरणम्	— २३ संभृतिद्युव्याप्त्यपि चातः ॥
१३ पुरुषविद्याधिकरणम्	— २४ पुरुषविद्यायामिव चेतरेषामाम्नानात् ॥
१४ वेधाद्यधिकरणम्	— २५ वेधाद्यर्थभेदात् ॥
१५ हान्यधिकरणम्	२६ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम् ॥
१६ सांपरायाधिकरणम्	२७ सांपराये तर्तव्याभावात् तथा ह्यन्ये । २८ छन्दत उभयाविरोधात् ॥
१७ गतेरर्थवत्त्वाधिकरणम्	२९ गतेरर्थवत्त्वमुभयथा, अन्यथा हि विरोधः । ३० उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥
१८ अनियमाधिकरणम्	३१ अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥
१९ यावदधिकाराधिकरणम्	३२ यावदधिकारमवस्थितिराधिकारिकाणाम् ॥
२० अक्षरध्यधिकरणम्	३३ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसवदत् तदुक्तम् ॥
२१ इयदधिकरणम्	— ३४ इयदामननात् ॥
२२ अन्तराधिकरणम्	३५ अन्तरा भूतग्रामवत् स्वात्मनः । ३६ अन्यथा भेदानुपपत्तिरिति चेन्न उपदेशान्तरवत् ॥
२३ व्यतिहाराधिकरणम्	— ३७ व्यतिहारो विशिंषन्ति हीतरवत् ॥
२४ सत्याद्यधिकरणम्	— ३८ सैव हि सत्यादयः ॥
२५ कामाद्यधिकाराधिकरणम्	— ३९ कामादीतरत्र तत्र चायतनादिभ्यः ॥

१६ आदराधिकरणम्	४० आदरादलोपः ।
	४१ उपस्थितेऽतस्तद्वचनात् ॥
१७ तन्निर्धारणाधिकरणम्	४२ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥
१८ प्रदानाधिकरणम्	४३ प्रदानवदेव तदुक्तम् ॥
१९ लिङ्गभूयस्त्वाधिकरणम्	४४ लिङ्गभूयस्त्वात्, तद्धि बलीयस्तदपि ।
	४५ पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ।
	४६ अतिदेशाच्च ।
	४७ विद्यैव तु निर्धारणात् ।
	४८ दर्शनाच्च ।
	४९ श्रुत्यादिबलीयस्त्वाच्च न बाधः ।
	५० अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ।
	५१ न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः ।
	५२ परेण च शब्दस्य ताद्विध्ये भूयस्त्वात्त्वनुबन्धः ॥
३० ऐकात्म्याधिकरणम्	५३ एक आत्मनः शरीरे भावात् ।
	५४ व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥
३१ अङ्गावबद्धाधिकरणम्	५५ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ।
	५६ मन्त्रादिवद्वाविरोधः ॥
३२ भूमज्यायस्त्वाधिकरणम्	५७ भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥
३३ शब्दादिभेदाधिकरणम्	५८ नाना शब्दादिभेदात् ॥
३४ विकल्पाधिकरणम्	५९ विकल्पोऽविशिष्टफलत्वात् ॥

३५ काम्याधिकरणम्

६० काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥

३६ यथाश्रयभावाधिकरणम्

६१ अङ्गेषु यथाश्रयभावः ।
६२ शिष्टेश्च ।
६३ समाहारात् ।
६४ गुणसाधारण्यश्रुतेश्च ।
६५ न वा तत्सहभावाश्रुतेः ।
६६ दर्शनाच्च ॥

साधनाख्ये तृतीयाध्याये

चतुर्थः पादः ।

१ पुरुषार्थाधिकरणम्

१ पुरुषार्थोऽतः शब्दादिति बादरायणः ।
२ शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ।
३ आचारदर्शनात् ।
४ तच्छ्रुतेः ।
५ समन्वारम्भणात् ।
६ तद्वतो विधानात् ।
७ नियमाच्च ।
८ अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात्
९ तुल्यं तु दर्शनम् ।
१० असार्वत्रिकी ।
११ विभागः शतवत् ।
१२ अध्ययनमात्रवतः ।
१३ नाविशेषात् ।
१४ स्तुयतेऽनुमतिर्वा ।
१५ कामकारेण चैके ।
१६ उपमर्दं च ।
१७ ऊर्ध्वरेतःसु च शब्दे हि ॥

२ परामर्शाधिकरणम्
१८ परामर्शं जैमिनिरचोदना चापवदति हि ।
१९ अनुष्ठेयं बादरायणः साम्यश्रुतेः ।
२० विधिर्वा धारणवत् ॥

३ स्तुतिमात्राधिकरणम्
२१ स्तुतिमात्रमुपादानादिति चेन्न, अपूर्वत्वात् ।
२२ भावशब्दाच्च ॥

४ पारिप्लवाधिकरणम्
२३ पारिप्लवार्था इति चेन्न, विशेषितत्वात् ।
२४ तथा चैकवाक्यतोपबन्धात् ॥

५ अग्नीन्धनाद्यधिकरणम् —२५ अत एव चाग्नीन्धनाद्यनपेक्षा ॥

६ सर्वापेक्षाधिकरणम्
२६ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ।
२७ शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥

७ सर्वान्नानुमत्यधिकरणम्
२८ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ।
२९ अबाधाच्च ।
३० अपिच स्मर्यते ।
३१ शब्दश्चातोऽकामकारे ॥

८ आश्रमकर्माधिकरणम्
३२ विहितत्वाच्चाश्रमकर्मापि ।
३३ सहकारित्वेन च ।
३४ सर्वथापि त एव, उभयलिङ्गात् ।
३५ अनभिभवं च दर्शयति ॥

९ विधुराधिकरणम्
३६ अन्तरा चापि तु तद्दृष्टेः ।
३७ अपिच स्मर्यते ।
३८ विशेषानुग्रहश्च ।
३९ अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥

१० तद्भूताधिकरणम्
४० तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥

११ आधिकारिकाधिकरणम्	४१ नचाधिकारिकमपि पतनानुमानात् तद्-योगात् । ४२ उपपूर्वमपि त्वेके भावमशनवत् त-दुक्तम् ॥
१२ बहिरधिकरणम्	—४३ बहिस्तूभयथापि स्मृतेराचाराच्च ॥
१३ स्वाम्यधिकरणम्	४४ स्वामिनः फलश्रुतेरित्यात्रेयः । ४५ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परि-क्रीयते । ४६ श्रुतेश्च ॥
१४ सहकार्यन्तरविध्यधि-करणम्	४७ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् । ४८ कृत्स्नभावात् तु गृहिणोपसंहारः । ४९ मौनवदितरेषामप्युपदेशात् ॥
१५ अनाविष्काराधिकरणम्	—५० अनाविष्कुर्वन्नन्वयात् ॥
१६ ऐहिकाधिकरणम्	५१ ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्श-नात् ॥
१७ मुक्तिफलाधिकरणम्	५२ एवं मुक्तिफलानियमस्तदवस्थावधृते-स्तदवस्थावधृतेः ॥

इति साधनाख्यस्तृतीयाध्यायः ॥

फलाख्ये चतुर्थाध्याये

प्रथमः पादः ॥

१ आवृत्त्यधिकरणम्	१ आवृत्तिरसकृदुपदेशात् ॥ २ लिङ्गाच्च ॥

२ आत्मत्वोपासनाधिकरणम्	३ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥
३ प्रतीकाधिकरणम्	४ न प्रतीके, नहि सः ॥
४ ब्रह्मदृष्ट्यधिकरणम्	५ ब्रह्मदृष्टिरुत्कर्षात् ॥
५ आदित्यादिमत्यधिकरणम्	६ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥
६ आसीनाधिकरणम्	७ आसीनः संभवात् । ८ ध्यानाच्च । ९ अचलत्वं चापेक्ष्य । १० स्मरन्ति च ॥
७ एकाग्रताधिकरणम्	११ यत्रैकाग्रता तत्राविशेषात् ॥
८ आप्रायणाधिकरणम्	१२ आ प्रायणात् तत्रापि हि दृष्टम् ॥
९ तदधिगमाधिकरणम्	१३ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥
१० इतरसंश्लेषाधिकरणम्	१४ इतरस्याप्येवमसंश्लेषः पाते तु ॥
११ अनारब्धाधिकरणम्	१५ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥
१२ अग्निहोत्राद्यधिकरणम्	१६ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् । १७ अतोऽन्यापि ह्येकेषामुभयोः ॥
१३ विद्याज्ञानसाधनाधिकरणम्	१८ यदेव विद्ययेति हि ॥
१४ इतरक्षपणाधिकरणम्	१९ भोगेन त्वितरे क्षपयित्वा संपद्यते ॥

फलाख्ये चतुर्थाध्याये

द्वितीयः पादः ।

१ वागधिकरणम्	१ वाङ्मनसि दर्शनाच्छब्दात् । २ अत एव च सर्वाण्यनु ॥

२ मनोधिकरणम्	— ३ तन्मनः प्राण उत्तरात् ॥
३ अध्यक्षाधिकरणम्	४ सोऽध्यक्षे तदुपगमादिभ्यः । ५ भूतेषु तच्छ्रुतेः । ६ नैकस्मिन् दर्शयतो हि ॥
४ आसृत्युपक्रमाधिकरणम्	७ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥
५ संसारव्यपदेशाधिकरणम्	८ तदापीतेः संसारव्यपदेशात् । ९ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः । १० नोपमर्देनातः । ११ अस्यैव चोपपत्तेरेष ऊष्मा ॥
६ प्रतिषेधाधिकरणम्	१२ प्रतिषेधादिति चेन्न शारीरात् । १३ स्पष्टो ह्येकेषाम् । १४ स्मर्यते च ॥
७ वागादिलयाधिकरणम्	—१५ तानि परे तथा ह्याह ॥
८ अविभागाधिकरणम्	—१६ अविभागो वचनात् ॥
९ तदोकोऽधिकरणम्	१७ तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥
१० रश्म्यधिकरणम्	१८ रश्म्यनुसारी । १९ निशि नेति चेन्न, संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥
११ दक्षिणायनाधिकरणम्	२० अतश्चायनेऽपि दक्षिणे । २१ योगिनः प्रति स्मर्यते स्मार्ते चैते ॥

फलाख्ये चतुर्थाध्याये

तृतीयः पादः ।

१ अर्चिराद्यधिकरणम्	— १ अर्चिरादिना तत्प्रथितेः ॥
२ वाय्वधिकरणम्	— २ वायुमब्दादविशेषविशेषाभ्याम् ॥

३ तडिदधिकरणम् —	३ तडितोऽधि वरुणः संबन्धात् ॥
४ आतिवाहिकाधिकरणम्	४ आतिवाहिकास्तल्लिङ्गात् । ५ उभयव्यामोहात् तत्सिद्धेः । ६ वैद्युतेनैव ततस्तच्छ्रुतेः ॥
५ कार्याधिकरणम्	७ कार्यं बादरिरस्य गत्युपपत्तेः । ८ विशेषितत्वाच्च । ९ सामीप्यात् तु तद्व्यपदेशः । १० कार्यात्यये तदध्यक्षेण सहातः परमभि-धानात् । ११ स्मृतेश्च । १२ परं जैमिनिर्मुख्यत्वात् । १३ दर्शनाच्च । १४ नच कार्ये प्रतिपत्त्यभिसंधिः ॥
६ अप्रतीकालम्बनाधिकरणम्	१५ अप्रतीकालम्बनान् नयतीति बादरायण उभयथादोषात् तत्क्रतुश्च । १६ विशेषं च दर्शयति ॥

फलाख्ये चतुर्थाध्याये

चतुर्थः पादः ।

१ संपद्याविर्भावाधिकरणम्	१ संपद्याविर्भावः स्वेन शब्दात् । २ मुक्तः प्रतिज्ञानात् । ३ आत्मा प्रकरणात् ॥
२ अविभागेनदृष्टत्वाधिकरणम्	४ अविभागेन दृष्टत्वात् ॥
३ ब्राह्माधिकरणम्	५ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः । ६ चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः । ७ एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥

४ संकल्पाधिकरणम्	८ संकल्पादेव तु तच्छ्रुतेः । ९ अत एव चानन्याधिपतिः ॥
५ अभावाधिकरणम्	१० अभावं बादरिराह ह्येवम् । ११ भावं जैमिनिर्विकल्पामननात् । १२ द्वादशाहवदुभयविधं बादरायणोऽतः । १३ तन्वभावे संध्यवदुपपत्तेः । १४ भावे जाग्रद्वत् ॥
६ प्रदीपाधिकरणम्	१५ प्रदीपवदावेशस्तथाहि दर्शयति । १६ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥
७ जगद्व्यापाराधिकरणम्	१७ जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च । १८ प्रत्यक्षोपदेशादिति चेन्न, आधिकारिकमण्डलस्थोक्तेः । १९ विकारावर्ति च, तथाहि स्थितिमाह । २० दर्शयतश्चैवं प्रत्यक्षानुमाने । २१ भोगमात्रसाम्यलिङ्गात् । २२ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥

इति फलाख्यश्चतुर्थाध्यायः ॥

समाप्तः शाङ्करभाष्यानुसारी

श्रीमद्बादरायणप्रणीतब्रह्मसूत्रपाठः ॥ ॐ ॥

अध्यायशः पादशश्च सूत्राणामधिकरणानां च संख्यादर्शः

अध्यायाः	पादाः	अधिकरणानि	सूत्राणि	आदितः अधिकरणानि	आदितः सूत्राणि
१	१	११	३१	११	३१
	२	७	३२	१८	६३
	३	१४	४३	३२	१०६
	४	८ [४०]	२८ [१३४]	४०	१३४
२	१	१३	३७	५३	१७१
	२	८	४५	६१	२१६
	३	१७	५३	७८	२६९
	४	९ [४७]	२२ [१५७]	८७	२९१
३	१	६	२७	९३	३१८
	२	८	४१	१०१	३५९
	३	३६	६६	१३७	४२५
	४	१७ [६७]	५२ [१८६]	१५४	४७७
४	१	१४	१९	१६८	४९६
	२	११	२१	१७९	५१७
	३	६	१६	१८५	५३३
	४	७ [३८]	२२ [७८]	१९२	५५५
४	१६	१९२	५५५		

ब्रह्मसूत्राधिकरणानां

शाङ्करभाष्यानुसारेण

वर्णानुक्रमसूचिः

समाप्ता ब्रह्मसूत्राधिकरणानां

शाङ्करभाष्यानुसारेण

वर्णानुक्रमसूचिः

श्रीमद्बादरायणप्रणीतानां ब्रह्मसूत्राणां
शाङ्करभाष्यानुसारेण
वर्णानुक्रमसूचिः

समाप्ता चेयं ब्रह्मसूत्राणां

शाङ्करभाष्यानुसारेण

वर्णानुक्रमसूचिः
